# Shivavidya Evam Shivadiksha Mahima

# शिवविद्या एवं शिवदीक्षा महिमा

## Document Information

Text title : Shivavidya or Shivadiksha Mahima

File name : shivavidyAevaMshivadIkShAmahimA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 23| 5-24 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# शिवविद्या एवं शिवदीक्षा महिमा

शिवदीक्षाप्रभावस्तु शिवेन ज्ञायते परः ।
यद्यप्यथापि तद्रूपं शृणु सादरमस्ति कः ॥ १॥

शिवमन्त्रे दीक्षितस्य तनुं दृष्ट्वाऽपि दूरतः ।
प्रयान्ति यमदूतास्तु तथा पातकपर्वताः ॥ २॥

अधुनैव त्वया दृष्टः पापाकारो गजो महान् ।
महापर्वतसङ्काशो ज्वलत्यद्यापि पश्य तम् ॥ ३॥

पापानि गजरूपेण निर्गतानि तवाधुना ।
मत्भालभूतिसङ्गेन मदङ्गालोकनादपि ॥ ४॥

दीक्षितः शैवविद्यायां बाल्ये भाग्यवशादहम् ।
श्रीकालकालकरुणां सम्पूर्णा मयि तिष्ठति ॥ ५॥

ये ये शाम्भाविद्यायां दीक्षितास्ते तपोधनाः ।
तत्पादरजला तावत् पावनं भुवनत्रयम् ॥ ६॥

यस्य शाम्भवविद्यायां भक्तिर्भवति भाग्यतः ।
तं नमन्ति सुराः सर्वे शर्वानुग्रहकाङ्क्षया ॥ ७॥

अक्षयं धनमस्माकं सा विद्या शाम्भवी खलु ।
अन्यत् धनं क्षयं याति न तद्याति क्षयं (नृप) ॥ ८॥

बहुपुण्याब्धयः शैवाः तां दीक्षां प्राप्य सादरम् ।
दृष्ट्वा भवन्ति ते तावत् द्वित्रा एव कलौ खलु ॥ ९॥

न यस्य पातकाद्भीतिः न यमादपि जायते ।
तस्य पुण्यस्वरूपस्य विद्या भवति शाम्भवी ॥ १०॥

कैलासमपि सम्प्राप्ताः शैवाः शाम्भवविद्यया ।
सोपानरूपा विद्येयं कैलासारोहणोद्यमा ॥ ११॥

नान्यैरुपायैस्तल्लाभः कैलासो दुर्लभोऽप्ययम् ।
सुलभत्वेन विज्ञेयस्तया शाम्भवविद्यया ॥ १२॥

न यस्य शाम्भवी विद्या तस्य जन्म निरर्थकम् ।
वन्ध्या तज्जननी (राजन्) तेन पुत्रेण किं फलम् ॥ १३॥

मानुषं जन्म सम्प्राप्य द्विजत्वं च विशेषतः ।
सम्प्राप्य शाम्भवीं विद्यां राजते द्विजराजवत् ॥ १४॥

तृप्ता भवन्ति पितरः तया शाम्भवविद्यया ।
तद्विद्यासहितं विषं प्रणमन्ति मुनीश्वराः ॥ १५॥

ब्राह्मणः शाम्भवीं विद्यां यावन्नाप्नोति पुण्यदाम् ।
तावन्न स प्रणामार्हो न दानार्होऽपि (भूपते) ॥ १६॥

अभ्यस्य शाम्भवीं विद्यां शिवार्चनरतो यदि ।
तदैव स्यात् प्रणामार्हो दानार्होऽपीति मन्महे ॥ १७॥

परमा शाम्भवी विद्या दुर्लभा परमार्थतः ।
अतस्तत्राधिकारोऽपि दुर्लभत्वेन निश्चितः ॥ १८॥

सम्प्राप्य शाम्भवीं विद्यां शम्भुपूजां करोति चेत् ।
तदा शिवेन सा पूजा गृह्यते प्रीतिपूर्वकम् ॥ १९॥

तथैव विद्यया दत्तं शिवलिङ्गे जलादिकम् ।
सुधात्वं याति तेनैव मुक्तास्तत्पितरोऽपि हि ॥ २०॥

॥ इति शिवरहस्यान्तर्गते शिवविद्या एवं शिवदीक्षा महिमा सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । हराख्यः तृतीयांशः । पूर्वार्धम् । अध्यायः २३। ५-२४ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 23. 5-24 ..

Proofread by Ruma Dewan

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*